© 2022 IJRTI | Volume 7, Issue 9 September 2022 | ISSN: 2456-3315

# हलन्तविमर्श:

**विश्वजित्-पात्र:**
**सहकारी अध्यापक:, संस्कृतविभाग:**
**विवेकानन्द-महाविद्यालय:**
**हरिपालम्, हुगली, पश्चिमबङ्गालम्, भारतम्**
**Email- biswapatra92@gmail.com**

**शोधसार:-** ये खलु जना: व्याकरणशास्त्रस्य स्वल्पमपि चर्चां कुर्वन्ति तै: हलन्तहसन्तादय: शब्दा: बहुवारं श्रुता:। व्याकरणशास्त्रे अस्य हलन्तस्य हसन्तस्य वा ( ् ) विशेषस्थानमस्ति। कश्चन वर्ण: स्वरयुक्त: स्वरविहीन: वेति हलन्तचिह्नेनैव निर्धारित: भवति। परन्तु हलन्तविषये व्याकरणस्य प्राथमिकपाठकानां मनसि बहुसंशय: विद्यते। वस्तुत: ये खलु पाठका: बाङ्गलाव्याकरणं संस्कृतव्याकरणं च किञ्चित् जानन्ति तेषां मनसि सर्वप्रथमं संशय: जायते हलन्त: हसन्त: च एकैव न वेति? कारणं पाणिनिव्याकरणे हसन्तशब्दस्य प्रयोग: नास्ति तत्र हलन्तशब्दस्य प्रयोग: दृश्यते। पुन: बाङ्गलाव्याकरणे हसन्तशब्दस्य प्रयोग: दृश्यते। तर्हि अत्र किं करणीयम्? हलन्त: हसन्त: वेति कथनीय:? प्रबन्धेऽस्मिन् व्याकरणस्य प्राथमिकपाठकानां एष: संशय: समाधानपर्वकं हलन्तस्य व्यवहारवैचित्र्यम् संक्षेपेण आलोच्यते।

**कुटशब्दा:-** हलन्त:, हसन्त:, पाणिनि:, संस्कृतव्याकरणम्, बाङ्गलाव्याकरणम्।

**प्रस्तावना**

व्याकरणशास्त्रे हलन्तस्य हसन्तस्य वा महत्वपूर्णा भूमिका वर्तते। एष: हलन्त: हसन्त: वा कश्चन वर्ण: स्वरयुक्त: स्वरविहीन: वेत्यस्मिन् विषये पाठकेभ्य: सुस्पष्टरुपेण भाषयति। वस्तुत: एष: हलन्त: हसन्त: वा स्वरविहीनान् व्यञ्जनवर्णान् प्रकाशयति। साधारणतया पृथिव्या: प्राय: सर्वासु भाषासु व्यञ्जनवर्णा: स्वरविहीना: भवन्ति। किन्तु स्वरविहीनव्यञ्जनानां तथा हलन्तयुक्तव्यञ्जनानां उच्चारणं कदापि न सम्भवति। तदर्थं वयं उपायानन्तरं न दृष्ट्वा व्यञ्जनवर्णान् स्वरसहितं उच्चारणं कुर्म्म:। अर्थात् यदा अस्माभि: व्यञ्जनवर्णा: उच्चारिता: भवन्ति तदा व्यञ्जनवर्णेषु स्वरवर्णस्योपस्थिति: दृश्यते। यथा क्-इत्यस्य व्यञ्जनस्य उच्चारणकाले (क्+अ) इति, ख्-इत्यस्य उच्चारणकाले (ख्+अ) इति एवं भवति। किन्तु जातु: कस्यचन शब्दस्य सम्यक् उच्चारणाय अर्थावबोधाय च व्यञ्जनवर्णेभ्य: स्वरस्य वियोजनार्थं हलन्तचिह्नस्य ( ् ) व्यवहार: दृश्यते। तथाहि पण्डिता: कथयन्ति यत् स्वरेण सह व्यञ्जनस्य सर्वदैव वैरिभाव: दृश्यते। अर्थात् यत्र स्वर: तिष्ठति तत्र हलन्तस्य अनुपस्थिति: दृश्यते, यत्र हलन्त: तिष्ठति तत्र स्वरस्य अनुपस्थिति: दृश्यते। यथा क्-इत्यत्र हलन्तचिह्नस्योपस्थिति: अस्ति परन्तु स्वरस्योपस्थिति: नास्ति, तदर्थम् एष: उच्चारणायोग्य:। क-इत्यत्र (क्+अ) स्वरस्योपस्थिति: अस्ति परन्तु हलन्तचिह्नस्योपस्थिति: नास्ति, तदर्थम् एष: उच्चारणयोग्य: इति।

यद्भवतु वर्तमानसमये हलन्तयुक्तवर्णान् अवबोधाय हलन्त-हसन्त-विरामादय: शब्दा: व्यवह्रियन्ते। तदर्थं प्राथमिकपाठका: संशयान्विता: भवन्ति यत् हलन्त: हसन्त: विराम: वेति कथनीय:? वस्तुत: य: हलन्त: सैव हसन्त: विराम: च। संस्कृतभाषायां य: हलन्त: वाङ्गलाभाषायां सैव हसन्त: विराम: चेति कथ्यते।

**हलन्तशब्दस्य प्रकृतार्थ:**

संस्कृतव्याकरणस्य अन्यतम: श्रेष्ठ: वैयाकरण: महामुनि: पाणिनि: तदीये अष्टाध्याय्यां स्वरविहीनवर्णान् प्रकाशयितुं हलन्तशब्दस्य प्रयोगं कृतवान्। स: १. अइउण् २. ऋलृक् ३. एओङ् ४. ऐऔच् ५. हयवरट् ६. लण् ७. ञमङणनम् ८. झभञ् ९. घढधष् १० जबगडदश् ११. खफछठथचटतव् १२. कपय् १३ शषसर् १४. हल् चेत्यादीन् चतुर्दशमाहेश्वरसूत्रान् अबलम्व्य द्विचत्वारिंशत् मतान्तरे त्रिचत्वारिंशत् अण्, अक्, अच्, अट्, अण्, अम्, अश्, अल्, इक्, इच्, इण्, उक्, एङ्, एच्, ऐच्, हश्, हल्, यण्, यम्, यञ्, यय्, यर्, वश्, वल्, रल्, मय्, ङम्, झष्, झश्, झय्, झर्, झल्, भष्, जश्, बश्, खय्, खर्, छव्, चय्, चर्, शर्, शल्, र चेत्यादिप्रत्याहारगठनेन स्वकीयम् अष्टाध्यायीम् अत्यन्तं संक्षिप्तं सारगर्भं च कृतवान्। एतेषु प्रत्याहारेषु हल्-प्रत्याहार: अन्यतम: अस्ति। 'आदिरन्त्येन सहेता' (१/१/७१) इति सूत्रानुसारं चतुर्दशसंख्यकमाहेश्वरसूत्रस्य हल्-इत्यस्य अन्तस्थिनेन इत्संज्ञकेन ल्-कारेन सह पञ्चमसूत्रस्य हयवरट्-इत्यस्य आदिवर्णस्य ह-कारस्य समन्वयेन हल्-प्रत्याहार: जायते। हल्-प्रत्याहारेण महामुनि: पाणिनि: समस्तव्यञ्जनवर्णान् गृहीतवान्। तदर्थं हलन्तशब्दस्य (हल्+अन्त) अर्थ: भवति य: वर्ण: व्यञ्जने एव समाप्त: सैव हलन्तवर्ण:। स्पष्टरूपेण वक्तुं शक्यते यत् यस्मिन् वर्णे स्वर: न तिष्ठति, व्यञ्जने एव समाप्त: भवति सैव हलन्तवर्ण: इति। वैयाकरणै: हलन्तवर्णा: ( ् ) अनेन चिह्नेन निर्दिश्यन्ते। यथा क्, ख्, ग् चेत्यादि:। एते व्यञ्जनवर्णा: स्वरविहीना: उच्चारणायोग्या: च भवन्ति।

**हलन्तस्य हसन्ते विवर्तनम्**

पूर्वोक्तालोचनायाम् अस्माभि: हलन्तशब्दस्य प्रकृतार्थ: सम्यक् ज्ञात:। इदनीं हलन्तशब्द: कदा हसन्तशब्दे विवर्तित: जात: तं विषयम् आलोचयिष्याम:। वस्तुत: हलन्त: हसन्त: च एकमेव विषयं प्रकाशयति। त्रयोदशशताब्द्या: प्रख्यात: वैयाकरण: वोपदेव: तस्य मुग्धबोधव्याकरणे सर्वप्रथमं हसन्तशब्दस्य प्रयोग: कृत:। तेन पाणिनिकृत: वर्णमालाक्रम: न स्वीकृत:। स: स्वतन्त्ररूपेण तस्य वर्णमालां सज्जीकृतवान्। स: तस्य वर्णमालां १. अइउऋलृक् २. एओङ् ३. ऐऔच् ४. हयवरल ५. ञणनङ्म ६. झढधघभ ७. जडदगव ८. खफछठथ ९. चटतकप १०. शषस चेत्यनेन प्रकारेण सज्जीकृतवान्। स: अपि तस्य व्याकरणं संक्षिप्तं सारगर्भं च कर्तुं एतत् वर्णक्रमम् अवलम्ब्य पाणिनिवत् अनेकान् प्रत्याहारान् संगठितवान्। तेषु हस्-प्रत्याहार: अन्यतम:। हस्-प्रत्याहारेण स: समस्तव्यञ्जनवर्णान् गृहीतवान्। तदर्थम् एतस्य हसन्तशब्दस्य (हस्+अन्त) अर्थ: भवति य: वर्ण: व्यञ्जनैव समाप्त: सैव हसन्तवर्ण:। अर्थात् यस्मिन् वर्णे स्वर: न तिष्ठति व्यञ्जनैव समाप्त: भवति सैव हसन्तवर्ण: भवति। यथा क् ख् ग् चेत्यादि:। तर्हि वयम् अत्र द्रष्टुं शक्नुम: यत् पाणिने: हलन्तेन सह वोपदेवस्य हसन्तस्य स्वरूपगत: कोऽपि भेद: नास्ति। परन्तु वोपदेवोत्तरकाले शनै: शनै: हलन्तशब्द: हसन्तशब्दे विवर्तित: जात:। यत: वङ्गभाषायां मुग्धबोधव्याकरणस्य गभीरप्रभाव: विद्यते तदर्थं

बङ्गभाषायां हलन्तापेक्षया हसन्तशब्द: अधिक: प्रचलित: अभवत्। अद्यावधि सैव प्रवाह: दृश्यते। अत एव हलन्तहसन्तयो: मध्ये किमपि स्वरूपगतपार्थक्यं नास्ति।

बाङ्गलाव्याकरणे प्रख्यातवैयाकरणेन सुनीतिकुमार-चट्टोपाध्यायेन पुन: हसन्तस्थाने विराम: इति शब्द: व्यवहृत:। तस्य मते कस्यचन वर्णस्य अन्ते हसन्तचिह्नस्य प्रयोगेन वर्णस्य उच्चारणे छेद: विराम: वा दृश्यते। तथाहि तेन हसन्तशब्दस्य स्थाने विराम: इति शब्द: गृहीत:। पाणिनिव्याकरणेऽपि विरामशब्दस्य प्रयोग: दृश्यते। तेन अवसानसंज्ञाप्रसङ्गे 'विरामोऽवसानम्' (१/४/११०) इति सूत्रे विरामशब्दस्य व्यवहार: कृत:। यस्य वर्णस्य उच्चारणात् परम् अन्यस्यापि कस्यचन वर्णस्योच्चारणं न सम्भवति स: भवति अवसानसज्ञक: वर्ण:। 'वर्णानाम् अभाव अवसानम् उच्यते' इति। तदर्थं सुनीतिकुमार-चट्टोपाध्यायेन हसन्तशब्दस्य स्थाने विराम: इति शब्दस्य व्यवहार: कृत:।

**हलन्तस्य व्यवहारवैचित्र्यम्**

उपर्युक्तालोचनायां वयं ज्ञातवन्त: यत् कश्चन वर्ण: स्वरयुक्त: स्वररहित: वा इति निर्धारयितुं हलन्तचिह्नस्य महत्वपूर्णा भूमिका वर्तते। किन्तु हलन्तचिह्नं न केवलं एतत् कार्यं करोति, भाषायां तत् बहुविधानि कार्याणि साधयति। तद्यथा-

**प्रथमत:-** शब्दगठने तथा पदगठने हलन्तचिह्नस्य विशेषगुरुत्वं वर्तते। यथा 'भोज्यम्' इति शब्दगठने 'ऋहलोर्ण्यत्' (३/१/१२४) इति सूत्रानुसारं भुज्+ण्यत् इति अवस्थायाम् अनुबन्धलोपे भुज्+य इति जाते 'पुगन्तलघुपधस्य च' इत्यनेन सूत्रेण उ-कारस्य गुणे ओ-कारे भो+य इति भूते 'चजो: कु घिण्यतो: (७/३/५२) इत्यनुसारं कुत्वप्राप्तौ 'भोज्यं भक्ष्ये' इत्यनेन सूत्रेण कुत्वनिषेधे भोज्+य इत्येव स्थिते विभक्तिकार्ये नपुंसकलिंगैकवचनविवक्षायां च 'भोज्यम्' इति रुपं सिध्यति। अत्र भुज्-धातो: ज्-कारे हलन्तचिह्नविद्यमानत्वात् स: स्वररहित: इति बोध्यव्य:। किन्तु यदि अत्र हलन्तचिह्नं न स्थास्यति तर्हि स: अकारान्तरूपेण गृहीत: भविष्यति। तेन भुज+य इत्यवस्थायां वर्णसंयोगाभावेन अशुद्धं पदं जनिष्यते। अत एव शब्दगठने तथा पदगठने हलन्तचिह्नस्य विशेषगुरुत्वम् अनस्वीकार्यम्।

**द्वितीयत:-** सन्धिकार्येऽपि हलन्तचिह्नस्य विशेषभूमिका वर्तते। यथा दिक्+अन्त: इत्यत्र 'झलां जशोऽन्ते' इति सूत्रानुसारं सन्धिकार्ये क्-स्थाने ग्-कारादेशे च दिगन्त: इति पदं सिध्यति। अत्र दिक्-शब्दस्य क्-कारे हलन्तचिह्नविद्यमानत्वात् स्वररहितत्वात् च स्वाभाविकनियमेन व्यञ्जनेन सह स्वरस्य मिलने शुद्धपदं जायते। परन्तु हलन्तचिह्नस्य अभावेन क्-कारं स्वरान्तरूपेण ग्रहणेन च अशुद्धं पदं निष्पद्यते।

**तृतीयत:-** युक्ताक्षरनिर्माणे प्राथमिकशर्तरूपेण हलन्तचिह्नस्य विशेषभूमिकास्ति। साधारणतया शुद्धव्यञ्जनवर्ण: (क्) उच्चारणायोग्य: भवति। तदर्थं वयं व्यञ्जनवर्णानां उच्चारणार्थं स्वरयुक्तव्यञ्जनं (क्+अ=क) उच्चाराम:। किन्तु स्वरयुक्तावस्थायां एकेन व्यञ्जनेन सह अन्यव्यञ्जनस्य संयोग: कदापि न सम्भवति। परन्तु यदि कस्मिंश्चित् व्यञ्जने हलन्तचिह्नस्य प्रयोग: दृश्यते तदा तत्र वयं तेन स्वररहितेन व्यञ्जनेन सह अपरं व्यञ्जनं योजयित्वा युक्ताक्षरं निर्मातुं समर्था: भवाम:। अपरत: यत्र युक्ताक्षर: विद्यते तत्र व्यञ्जनेषु स्वरस्य अनुपस्थिति: स्वीकरणीया इति। यत्तु संस्कृतश्लोकस्य छन्दनिर्णयकाले अक्षरविभाजने विशेषसाहाय्यं करोति।

**चतुर्थत:-** कस्यचन पदस्य सुस्पष्टोच्चारणे सम्यक् अर्थावबोधने च हलन्तचिह्नस्य गुरुत्वमनस्वीकार्यम्। यथा वृक्षान् इत्यत्र न्-कारे हलन्तचिह्नविद्यमानत्वात् अत्र अकारस्योच्चारणं न करणीयम्। अन्यथा उच्चारणदोषेन वृक्षान्-शब्दस्य यथार्थाबोध: कदापि न सम्भवति।

**उपसंहारः**

व्याकरणशास्त्रे हलन्तस्य कीदृश: महत्वपूर्ण: प्रभाव: वर्ततेति विषय: अत्र अत्यन्तसंक्षिप्ततया आलोच्यते। व्याकरणस्य प्राथमिकपाठकानां कृते हलन्तस्य व्यवहारवैचित्र्यम् अवश्यमेव ज्ञातव्यम्। नोचेत् ते शब्दगठनरहस्यं कदापि न सम्यक्तया अवगन्तुं समर्था: भविष्यन्ति। अपि च स्वरविहीनव्यञ्जनवर्णा: हलन्तवर्णा: हसन्तवर्णा: वा इत्यत्र किं कथनीयमित्यस्मिन् विषयेऽपि आलोचना वर्तते। या खलु प्राथमिकपाठकानां संशयदूरीकरणे सहायका भविष्यतीति शम्।

**सहायकग्रन्थसूची**


१. चक्रवर्ती, सत्यनारायण:, पाणिनीय शब्दशास्त्र, संस्कृत-पुस्तक-भाण्डार:, प्रथमप्रकाश:, २००३, कलकाता।

२. लाहिडि, प्रवोधचन्द्र:, शास्त्री हृषीकेश:, पाणिनीयम्, दि ढाका स्टुडेन्दस् लाइब्रेरी, षष्ठसंस्करणम्, पुनमुद्रणम्, आगस्ट २००९, कलकाता।

३. भट्टाचार्य: तपनशङ्कर:, अष्टाध्यायी, संस्कृत-वुक-डिपो, प्रथमप्रकाश:, पुनर्मुद्रणम्, मार्च २०१२, कलकाता।

४. च्याटार्जी, क्षितिशचन्द्र:, टेकनिक्याल टार्मस् एण्ड टेकनिक ओफ् स्यान्सकृत ग्रामार, संस्कृत-पुस्तक-भाण्डार:, २००४, कलकाता।

५. श्रीगोविन्दाचार्य:, शर्मा, लक्ष्मी, वैयाकरणसिद्धान्तकौमुदी, चौखम्बा सुरभारती प्रकाशन, वाराणसी, २०१६।

६. चतुर्वेद:, गिरिधरशर्मा, विद्याभास्कर:, परमेस्वरानन्दशर्मा, वैयाकरणसिद्धान्तकौमुदी, पुनर्मुद्रणम्, मोतिलाल वनारसीदास, दिल्ली, २०१२।

७. त्रिपाठी, जयशङ्करलाल:, मालवीय:, सुधाकर:, काशिका, तारा-वुक्-एजेन्सी, वाराणसी, २००९ (प्रथमसंस्करणम्, पुनर्मूद्रणम्).

८. पाल:, विपद्भञ्जन:, श्रीवरदराजविरचिता लघुसिद्धान्तकौमुदी, सदेश:, प्रथमप्रकाश:, द्वितीयसंस्करणम्,२०१२ कलकाता।

९. पण्डा अशोक-कुमार:, वैयाकरणसिद्धान्तकौमुदी अजन्तपुंलिङ्गप्रकरणम्, प्रग्रेसिभ पावलिशार्स, प्रथमप्रकाश: २०१२, कलकाता।

१०. गङ्गोपाध्याय: मृणालकान्ति:, वैयाकरणसिद्धान्तकौमुदी संज्ञापरिभाषाप्रकरणम्, संस्कृत वुक् डिपो, द्वितीयसंस्करणम्, १४२० वङ्गाव्द:, कलकाता।